अष्टमः पाठः

5KQBLE

# कुम्भमेला

अस्माकं प्रदेशस्य मध्य- दक्षिणभागे अतिप्राचीनं प्रयागनगरं स्थितमस्ति, यस्योत्तरतः गङ्गा दक्षिणतः यमुना च नद्यौ प्रवहतः। तत्र सरस्वत्याः नद्याः अपि काचिद् अदृश्यधारा वहतीति पुराणेषु वर्णितम्। तस्य नगरस्य प्राच्यां दिशि तिसृणामपि नदीनां भवति कश्चित् शोभनः सङ्गमः। अतः तत्स्थानं त्रिवेणीः, त्रिवेणीसङ्गमः इति नाम्नापि सर्वत्र प्रसिद्धमस्ति यतो हि तत्र तिस्रः वेण्यः नदीधाराः परस्परं मिलित्वा एकीभवन्ति। तस्याः एव त्रिवेण्याः सङ्गमतटे प्रतिद्वादशवर्षं कुम्भमेला लगति।



अस्ति श्रीमद्भागवतादि - महापुराणेषु समुद्रमन्थनस्य प्रसिद्धा कथा वर्णिता। पूर्वं सत्ययुगे देवाः दानवाश्च मिलित्वा समुद्रम् अमथ्नन्। तस्मात् चतुर्दश रत्नानि उदभवन्। तेषु सुवर्णकुम्भं हस्तयोः धृत्वा उत्पन्नः धन्वन्तरिः अप्येकं रत्नम् आसीत्। तस्य कनककुम्भे अमृतमासीत्। श्रीविष्णोः आज्ञया तस्य वाहनं गरुडः तम् अमृतकुम्भम् अहरत्। ततः दानवाः अमृतं पातुं तम् अन्वधावन्। अनुगच्छतः तान् दानवान् परावर्तयितुं गरुडः तैः सह चतुर्षु स्थानेषु युद्धम् अकरोत्। तस्मिन् युद्धे हस्तधृतात् तस्माद् अमृतकुम्भात् किञ्चिद्

अमृतं चतुर्षु स्थानेषु अपतत्। अतः तेषु चतुर्षु स्थानेषु अमृतं प्राप्तुं जनाः कुम्भमेलाम् आयोजयन्ति। तानि चत्वारि स्थानानि हरिद्वारं प्रयागः नासिकम् उज्जैनं चेतिसन्ति।

प्रयागे त्रिवेणीतटे जनाः माघमासे मकरगते रवौ एकमासस्य कल्पवासं कर्त्तुं यद्यपि प्रतिवर्षम् आयान्ति, तथापि प्रतिद्वादशवर्षं 'कुम्भपर्व' प्रतिषड्वर्षं च 'अर्द्धकुम्भपर्व' इति नाम्ना प्रथिता कुम्भमेला प्रचलति।

अस्यां मेलायां पर्वणि-पर्वणि लक्षाधिकाः जनाः आगच्छन्ति। तेषु श्रद्धालवः गृहस्थाः, साधवः, यतयः संन्यासिनश्च सहस्राधिकाः एकमासं निवसन्ति। एतेषां सर्वेषां जनानाम् आवासार्थं शासनं

सर्वविधां सार्वजनिकसुविधां प्रददाति। मेलायाः व्यवस्थायै शासने एकः पृथक् विभागः एव स्थापितः। अतः अत्र सत्यपि जनसम्मर्दे काप्यसुविधा असुरक्षा वा न भवति। तस्मात् इमां विश्वस्य प्रमुखां कुम्भमेलां द्रष्टुं सर्वैः जनैः आगन्तव्यम्।

## शब्दार्थ

अदृश्यधारा = विलुप्तधारा। दिशि = दिशा में। अमथ्नन् = मंथन किए। धृत्वा = धारण कर, रखकर। कनककुम्भे = सोने के कलश में। परावर्तयितुम् = लौटाने के लिए। मकरगते = मकर राशि पर स्थित होने पर। कल्पवासम् = संगम क्षेत्र में ही नियमपूर्वक रहने का संकल्प लेकर निवास करना। प्रथिता = प्रसिद्ध। सत्यपि = होने पर भी। जनसम्मर्दे = लोगों की भीड़।

## अभ्यास

1.उच्चारण करें-

मध्यदक्षिणभागे, यस्योत्तरतः, सरस्वत्याः,

परावर्तयितुम् , सहस्राधिकाः, प्रतिद्वादशवर्षम्।

2.एकपद में उत्तर दें-

(क) सङ्गमतटे प्रतिद्वादशवर्षं का लगति ?

(ख) सुवर्णकुम्भं हस्तयोः धृत्वा कः उत्पन्नः ?

(ग) कनककुम्भे किम् आसीत् ?

(घ) कल्पवासं कर्तुं जनाः कस्मिन् मासे आगच्छन्ति ?

3.एकवाक्य में उत्तर दें-

(क) समुद्रमन्थनस्य प्रसिद्धा कथा कुत्र वर्णिता ?

(ख) सत्ययुगे के मिलित्वा समुद्रम् अमथ्नन् ?

(ग) त्रिवेणीतटे जनाः कदा कल्पवासं कर्तुम् आगच्छन्ति ?

(घ) कां द्रष्टुं सर्वैः जनैः प्रयागे आगन्तव्यम् ?

4.निम्नलिखित पदों का सन्धि-विच्छेद करें-

| पद | सन्धि-विच्छेद |
|---|---|
| यस्योत्तरतः | .............. + ................. |

अप्येकम् ............. + ................

नाम्नापि ............. + ................

काप्यसुविधा ............. + ................

5.रेखांकित पदों के आधार पर प्रश्न निर्माण करें-

(क) कनककुम्भे अमृतम् आसीत्।

(ख) अमृतं प्राप्तंु जनाः कुम्भमेलाम् आयोजयन्ति।

(ग) अमृतकुम्भात् किञ्चिद् अमृतं चतुर्षु स्थानेषु अपतत्।

(घ) गरुडः अमृतकुम्भम् अहरत्।

6.संस्कृत में अनुवाद करें-

(क) नगर की पूर्व दिशा में नदियों का संगम है।

(ख) देवों और दानवों ने मिलकर समुद्र मथा।

(ग) भारत के चार स्थानों पर अमृत की बूँदें पड़ीं।

(घ) प्रत्येक बारह वर्ष पर कुम्भ मेला लगता है।

**शिक्षण-संकेत-**

अपने गाँव या नगर के पास जो मेला लगता हो, उसका दस पंक्तियों में वर्णन कराएँ।

**इसे भी जानें**

समुद्र मंथन से निकले चौदह रत्न हैं-

रम्भा विष वारुण ी (मदिरा) अमृत

ृंख ऐरावत (हाथी) धनुष धन्वन्तरि

कामधेनु कल्पवृक्ष चन्द्रमा उच्चैःश्रवा (घोड़ा)

श्री (लक्ष्मी) कौस्तुभमणि